# प्रथमः पाठः । सुष्ठु गृहीतः चौरः । प्रथमः घटकः ।

देवदत्तः नाम कोऽपि धनिकः आसीत् । एकदा तस्य धनस्यूतः लुप्तः। तस्य गृहे षड् भृत्याः आसन्। तेषु एव एकः चौरः स्यात्, इति तस्य मतम्। चौरं ग्रहीतुं सः वीरबलं साहाय्यम् अयाचत। वीरबलः अवदत्, ''मित्र! अद्य सायङ्काले तव सर्वान् भृत्यान् मम गृहं प्रेषय'' इति।





यथानिश्चितं सर्वे सेवकाः वीरबलस्य गृहम् आगताः। वीरबलेन पूर्वमेव सर्वेषां कृते समानोन्नतयः यष्टिकाः आनीताः। सः सेवकान् अवदत्, ''भोः पश्यन्तु, एताः मायायष्टिकाः। तासु एकां यष्टिकां स्वीकृत्य सर्वैः देवदत्तस्य गृहं गन्तव्यं, श्वः प्रभाते पुनरागन्तव्यम् । येन केनापि धनस्यूतः चोरितः स्यात् तस्य यष्टिका अङ्गुलिमात्रं दीर्घा भविष्यति।''

रात्रौ सर्वे भृत्याः सुखेन निद्राम् अकुर्वन् ऋते एकस्मात्। सः अचिन्तयत्, ''श्वः प्रातः मम चौर्यं प्रकटितं भवेत्। अतः अहम् अधुना एव मम यष्टिकाम् अङ्गुलिमात्रं कर्तयामि।'' इति चिन्तयित्वा तथा कृत्वा सः सुखेन सुप्तः।





अन्येद्युः लघुयष्टिकां दृष्ट्वैव वीरबलेन चौरः सम्यक् ज्ञातः गृहीतः च । अपराधी भृत्यः वीरबलस्य पादयोः पतित्वा स्वस्य अपराधम् अङ्गीकृतवान् धनस्यूतं च प्रत्यर्पितवान् ।

**भाषाभ्यास:** 

## १. उचितं पर्यायं चिनुत।

१. कस्य धनस्यूत: लुप्त: ?

(अ) देवदत्तस्य (आ) वीरबलस्य (इ) भृत्यस्य (ई) नृपस्य

२. गृहे कति भृत्या: आसन् ?

(अ) पञ्च (आ) सप्त (इ) षड् (ई) एक:

३. वीरबल: कस्य मित्रम् ?

(अ) भृत्यस्य (आ) धनिकस्य (इ) यष्टिकाया: (ई) चौरस्य

४. 'श्व: मम चौर्यं प्रकटितं भवेत्।' इति चिन्ता कस्य चित्ते जायते?

(अ) दासस्य (आ) वीरबलस्य (इ) धनिकस्य (ई) नृपस्य

## २. क: कं वदति ?

१. ''पश्यन्तु एता: मायायष्टिका:।'' २. ''मित्र, अद्य सायङ्काले तव सर्वान् भृत्यान् मम गृहं प्रेषय।''

## ३. माध्यमभाषया उत्तरं लिखत। 
१. वीरबलेन चौर: कथं गृहीत: ?

## ४. स्तम्भमेलनं कुरुत।

| विशेषणम् | विशेष्यम् |
|---|---|
| समानोन्नतय: | धनस्यूत: |
| सर्वान् | चौर: |
| लुप्त: | यष्टिका: |
| गृहीत: | भृत्यान् |

## ५. विरुद्धार्थकशब्दानां युग्मं चिनुत लिखत च।




## ६. पाठात् समानार्थकं शब्दं चित्वा रेखाचित्रं पूरयत।

१)




२)




३)




४)

